Card

M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 436

Title: Shiksha-Chhanda-Nighanta

Pho. 3.

T. B. COLLEGE, SURAT
Manuscripts Library
No. Ref.
Ser. 436
tle: Shiksha-Chhanda-
Nighanta

436

शिक्षा - छंद - निघंट ॥
पर्यांतम

Title	Shiksha - Chhanda -
Author	Nighanta.
Editor	
Year, Vols.	Saka 1747
Publisher	
Remarks	436

436

अथशिक्षाप्रारंभः

शि. श्रीगणेशायनमः ॥ हरिः ॐ ॥ अथशिक्षांप्रवक्ष्यामिपाणिनीयंम
१ तंयथा ॥ शास्त्रानुपूर्वंतद्विद्याद्यथोक्तंलोकवेदयोः ॥ प्रसिद्धमपिश
ब्दार्थमविज्ञातमबुद्धिभिः ॥ पुनर्व्यक्तीकरिष्यामिवाचउच्चारणेविधिं ॥
त्रिषष्टिश्चतुःषष्टिर्वावर्णाःशंभुमतेमताः ॥ प्राकृतेसंस्कृतेचापिस्वयंप्रो
क्ताःस्वयंभुवा ॥ स्वराविंशतिरेकश्चस्पर्शानांपंचविंशतिः ॥ यादयश्च
स्मृताह्यष्टौचत्वारश्चयमास्मृताः ॥ अनुस्वारोविसर्गश्चकःपौचापिप
राश्रितौ ॥ दुस्पृष्टश्चेतिविज्ञेयोऌकारःप्लुतएवच ॥ १ ॥ आत्माबुध्यास
मेत्यार्थान्मनोयुंक्तेविवक्षया ॥ मनःकायाग्निमाहंतिसप्रेरयतिमारुतं ॥ १
मारुतस्तूरसिचरन्मंद्रंजनयतिस्वरम् ॥ प्रातःसवनयोगंतंछंदोगाय

त्रमाश्रितं ॥ कंठेमाध्यंदिनयुगंमध्यमंत्रैष्टुभानुगं ॥ तारंतार्तीयसव
नंशीर्षण्यंजागतानुगं ॥ सोदीर्णोमूर्ध्न्यभिहतोवक्त्रमापद्यमारुतः
॥ वर्णाञ्जनयतेतेषांविभागःपंचधास्मृतः ॥ स्वरतःकालतःस्थानात्प्र २
यत्नानुप्रदानतः ॥ इतिवर्णविदःप्राहुर्निपुणंतंनिबोधत ॥ २ ॥ उदा
त्तश्चानुदात्तश्चस्वरितश्चस्वरास्त्रयः ॥ ह्रस्वोदीर्घःप्लुतइतिकालतो
नियमाअचि ॥ उदात्तेनिषादगांधारावनुदात्तऋषभधैवतौ ॥ स्वरि
तप्रभवाह्येतेषड्जमध्यमपंचमाः ॥ अष्टौस्थानानिवर्णानामुरःकंठः
शिरस्तथा ॥ जिह्वामूलंचदंताश्चनासिकोष्ठौचतालुच ॥ ओभावश्च
विवृत्तिश्चशषसारेफएवच ॥ जिह्वामूलमुपध्माचगतिरष्टविधोष्मणः ॥ य

शिक्षा घोभावप्रसंधानमुकारादिपरंपदं ॥ स्वरांतंतादृशंविद्याद्यदन्यद्व्यक्तमूष्म
२ णः ॥ ३ ॥ हकारंपंचमैर्युक्तमंतस्थाभिश्चसंयुतं ॥ औरस्यंतंविजानीयात्कं
ठ्यमाहुरसंयुतं ॥ कंठ्यावहाविचुयशास्तालव्याः ओष्ठजावुपू ॥ स्युर्मू
र्धन्याऋटुरषादंत्यालृतुलसाःस्मृताः ॥ जिह्वामूलेतुकुःप्रोक्तोदंत्योष्ठ्योव
स्मृतोबुधैः ॥ एऐतुकंठतालव्याओऔकंठोष्ठजौस्मृतौ ॥ अर्धमात्रातु
कंठ्यास्यादेकारैकारयोर्भवेत् ॥ ओकारौकारयोर्मात्रातयोर्विवृतसंवृ
त्रि तं ॥ संवृतंमात्रिकंज्ञेयंविवृतंतुद्विमात्रकं ॥ घोषावासंवृताःसर्वेअघो राम
षाविवृताःस्मृताः ॥ ४ ॥ स्वराणामूष्मणांचैवविवृतंकरणंस्मृतं ॥ तेभ्यो २
पिविवृतावेङौताभ्यामैचौतथैवच ॥ अनुस्वारयमाणांचनासिकास्था

हा
नमुच्यते ॥ अयोगवौविज्ञेयाआश्रयस्थानभागिनः ॥ अलाबुवीणानिर्घोषो
दंतमूल्यस्वराननु ॥ अनुस्वारस्तुकर्तव्योनित्यंह्रोःशषसेषुच ॥ अनुस्वारे
विवृत्यांतुविरामेचाक्षरद्वये ॥ द्विरोष्ठ्यौतुविगृह्णीयाद्यत्रोकारवकारयोः ॥
व्याघ्रीयथाहरेत्पुत्रान्दंष्ट्राभ्यांनचपीडयेत् ॥ भीतापतनभेदाभ्यांतद्वद्वर्णा
न्प्रयोजयेत् ॥ ५ ॥ यथासौराष्ट्रिकानारीतक्राँ इत्यभिभाषते ॥ एवंरंगाः
प्रयोक्तव्याःखेअराँ इवखेदया ॥ रंगवर्णंप्रयुंजीरन्नोग्रसेत्पूर्वमक्षरं
॥ दीर्घस्वरंप्रयुंजीयात्पश्चान्नासिक्यमाचरेत् ॥ हृदयेचैकमात्रस्त्वर्धमा
त्रस्तुमूर्धनि ॥ नासिकायांतथार्धंचरंगस्यैवंद्विमात्रता ॥ हृदयादुत्करेति
ष्ठन्कांस्येनसमनुस्वरन् ॥ मार्दवंचद्विमात्रंचजघन्वाँ इतिनिदर्शनं ॥ म

ध्येतुकंपयेत्कंपमुभौपार्श्वौसमौभवेत्॥ सरंगंकंपयेत्कंपंरथीवेतिनिदर्शी

नं॥एवंवर्णाः प्रयोक्तव्यानाव्यक्तानचपीडिताः॥सम्यग्वर्णप्रयोगेण
ब्रह्मलोकेमहीयते॥६॥गीतीशीघ्रीशिरःकंपीतथालिखितपाठकः॥
अनर्थज्ञोल्पकंठश्चषडेतेपाठकाधमाः॥माधुर्यमक्षरव्यक्तिःपदछेदस्तु
सुस्वरः॥धैर्यंलयसमर्थंचषडेतेपाठकागुणाः॥शंकितंभीतमुद्घुष्टमव्यक्त
ना मव्यक्तमनुनासिकं॥काकस्वरंशिरसिगतंतथास्थाननविवर्जितं॥उपांशुद
ष्टंत्वरितंनिरस्तंविलंबितंगद्गदितंप्रगीतं॥निष्पीडितंग्रस्तपदाक्षरंचवदें राम
नदीनंनतुसानुनास्यं॥प्रातःपठेन्नित्यमुरःस्थितेनस्वरेणशार्दूलरु २
तोपमेन॥मध्यंदिनेकंठगतेनचैवचक्राकसंकूजितसंनिभेन॥ता

रंतुविद्यात्सवनंतृतीयंशिरोगतंतच्चसदाप्रयोज्यं॥मयूरहंसान्यभृ
तस्वराणांतुल्येननादेनशिरस्थितेन॥७॥अचोस्पृष्टायणस्त्वीषंनेमिस्पृष्टाःशर
स्मृताः॥शेषाःस्पृष्टाहलःप्रोक्तानिबोधानुप्रदानतः॥यमोनुनासिकानक्रो
नादिनोहझषस्मृताः॥ईषन्नादायणजश्चश्वासिनस्तुखफादयः॥ईषछ्वासां
श्चरोविद्याद्गोधींमेतत्प्रचक्षते॥दाक्षीपुत्रःपाणिनिनायेनेदंव्यापितंभु
वि॥छंदःपादौतुवेदस्यहस्तौकल्पोथपठ्यते॥ज्योतिषामयनंचक्षुर्नि
रुक्तंश्रोत्रमुच्यते॥शिक्षाघ्राणंतुवेदस्यमुखंव्याकरणंस्मृतं॥तस्मात्सां
गमधीत्यैवब्रह्मलोकेमहीयते॥८॥उदात्तमाख्यातिवृषोंगुलीनांप्र
देशिनीमूलनिविष्टमूर्धा॥उपांतमध्येस्वरितंध्रुतंचकनिष्ठिकायाम

शिक्षा ४ नुदात्तमेव॥उदात्तंप्रदेशिनींविद्यात्प्रचयंमध्यतोंगुलिं॥निहतंतुकनिष्ठिक्यांस्व
रितोपकनिष्ठिकां॥अंतोदात्तमाद्युदात्तमुदात्तमनुदात्तंनीचस्वरितं॥मध्योदा
त्तंस्वरितंद्व्युदात्तंत्र्युदात्तमितिनवपदशय्या॥अग्निःसोमःप्रवोवीर्यंहविषांस्व
र्बृहस्पतिरिंद्राबृहस्पती॥अग्निरित्यंतोदात्तंसोमइत्याद्युदात्तंप्रेत्युदात्तंवइ
त्यनुदात्तंवीर्यंनीचस्वरितं॥हविषांमध्योदात्तंस्वरितिस्वरितं॥बृहस्पतिरि
तिद्व्युदात्तंमिंद्राबृहस्पतीइतित्र्युदात्तं॥अनुदात्तोहृदिज्ञेयोमूर्ध्न्युदात्तउदाहृ
तः॥स्वरितःकर्णमूलीयःसर्वास्येप्रचयःस्मृतः॥ ९ ॥चाषस्तुवदतेमात्रां राम
द्विमात्रंत्वेववायसः॥शिखीरौतित्रिमात्रंतुनकुलस्त्वर्धमात्रकं॥कुतीर्थादा ४
गतंदग्धमपवर्णंचभक्षितं॥नतस्यपाठेमोक्षोऽस्तिपापाहेरिवकिल्बिषात्॥सु

गव
तीर्थादागतंव्यक्तंस्वाम्नाय्यंसुव्यवस्थितं॥सुस्वरेणसुवक्त्रेणप्रयुक्तंब्रह्मराजते॥मंत्रो
हीनःस्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह॥सवाग्वज्रोयजमानंहिनस्तियथें प्र
द्रशत्रुःस्वरतोऽपराधात्॥अवक्षरंहनायुष्यंविस्वरंव्याधिपीडितं॥अक्षताशस्त्ररू
पेणवज्रंपततिमस्तके॥हस्तहीनंतुयोधीतेस्वरवर्णविवर्जितं॥ऋग्यजुःसामभि
र्दग्धोवियोनिमधिगच्छति॥हस्तेनवेदंयोधीतेस्वरवर्णार्थसंयुतं॥ऋग्यजुःसामभिः
पूतोब्रह्मलोकेमहीयते॥ १० ॥शंकरःशांकरींप्रादाद्दाक्षीपुत्रायधीमते॥वाङ्म
येभ्यःसमाहृत्यदेवींवाचमितिस्थितिः॥येनाक्षरसमाम्नायमधिगम्यमहेश्वरात्॥
कृत्स्नंव्याकरणंप्रोक्तंतस्मैपाणिनयेनमः॥येनधौतागिरःपुंसांविमलैःशब्दवारि
भिः॥तमश्चाज्ञानजंभिन्नंतस्मै०॥अज्ञानांधस्यलोकस्यज्ञानांजनशलाक

शिक्षा या॥ चक्षुरुन्मीलितंयेनतस्मैपा०॥ त्रिनयनमभिमुखनिःसृतामिमांयइहपठेत्प्रय
९ तश्चसदाद्विजः॥ सभवतिधनधान्यपशुपुत्रकीर्तिमान्नतुलंचसुखंसमश्नुते
दिवीतिदिवीति॥ ३१॥ अथशिक्षामात्मोदात्तश्चैरुकारंस्वराणांयथागीत्यचो
स्पष्टोदात्तंचापस्तुतंशंकरएकादशी॥ ॥ॐ पंचसंवत्सरमयंयुगाध्यक्षंप्र
जापतिं॥ दिनर्त्वयनमासांगंप्रणम्यशिरसाशुचिः॥ प्रणम्यशिरसाकालम
भिवाद्यसरस्वती॥ कालज्ञानंप्रवक्ष्यामिलगधस्यमहात्मनः॥ ज्योति
षामयनंकृत्स्नंप्रवक्ष्याम्यनुपूर्वशः॥ विप्राणांसंमतंलोकेयज्ञकालार्थसिद्ध राम
ये॥ निरेकंद्वादशार्धाब्दंद्विगुणंगतसंज्ञिकं॥ षष्ट्याषष्ट्यायुतंद्वाभ्यांपर्वणांरा ९
शिरुच्यते॥ स्वरार्कमेकेसोमार्कौयदासाकंसवासवौ॥ स्याल्तदादियुगंमा

घःस्तपःशुक्लोदिनंत्सजः॥ १॥ प्रपद्येतेश्रविष्ठादौसूर्याचंद्रमसावुदक्॥ सार्पार्धेद
क्षिणार्कस्तुमाघःश्रावणयोःसदा॥ घर्मवृद्धिरपांप्रस्थःक्षपाह्रासउदग्गतौ॥ दक्षि
णेतौविपर्यस्तौषण्मुहूर्त्ययनेनतु॥ द्विगुणंसप्तमंचाहुरयनाद्यंत्रयोदश॥ चतुर्थं
दशमंचैवद्वियुग्माद्यंबहुलेप्यृतौ॥ वसुस्त्वष्टाभगोजश्चमित्रःसर्पाश्विनौजलं॥ धा
ताकश्चायनाद्याश्चार्धपंचभस्त्वृतुः॥ भांशास्युरष्टकाःकार्याःपक्षाद्वादशकोद्
गताः॥ एकादशगुणस्यानःशुक्लेर्धंचैंद्रवायदि॥ २॥ कार्याभांशाष्टकास्थानेक
लाएकान्नविंशतिः॥ ऊनस्थानेद्विसप्ततीरुद्धपेदूनसंमिताः॥ त्र्यहंशीभन्ने
षोदिवसांशभागश्चतुर्दशस्याप्युपनीतभिंन्नं॥ भार्धेधिकेचाधिगतेपरेंशेद्वौ
बुतुमेकंनकेरवेद्यं॥ पक्षासंचदशाचोर्ध्वंतद्भुक्तमितिनिर्दिशेत्॥ नवभिस्तद्गतो
व

शिक्षा ६ शस्यादूनांशाद्यधिकेनतु॥जौद्राघः खेश्वेहीरोषाश्चिन्मूषण्यः सोमाधानः॥रेमृध्रा
श्वाऽओजस्त्वघोहेर्येष्ठाइत्यक्षालिंगेः॥जाबाद्यंशेः समंविद्यात्पूर्वार्धेपार्वसूत्तरे॥
भादानांशाश्चतुर्दशीकाष्ठानांदेविनाकलाः॥३॥कलादशाचविंशास्याद्विमुहू
र्तस्तुनाडिके॥द्वित्रिंशास्तत्कलानांतुषट्शतीत्र्यधिकंभवेत्॥नाडिकेद्वेमुहूर्त
स्तुपंचाशत्सलमाषकं॥माषकात्कुंभकोद्रोणःकुटपैर्वर्धतेत्रिभिः॥ससप्तकुंभ
युक्स्यापः सूर्याद्योनिंत्रयोदश॥नवमानिचपंचाह्नः काष्ठाःपंचाक्षरास्मृ
ताः॥श्रविष्ठाभ्यांगुणाभ्यस्तान्प्राग्विलग्नान्विनिर्दिशेत्॥सूर्यान्मासान्षडभ्य राम
स्तांन्विद्याचांद्रमसान्तत्॥अतीतपर्वभागेषुशोधयेद्विगुणांतिथिं॥तेषु ६
मंडलभागेषुतिथिनिष्ठांगतोरविः॥४॥याःपर्वभादानकलास्तासुसप्त

गुणांतिथिं॥प्रक्षिपेत्कलासमूहस्तुविद्यादादानकीःकलाः॥यदुत्तरस्या
यनतोयनंस्याच्छेषंतुयद्दक्षिणतोयनस्य॥तदेवषष्ट्याद्विगुणंविभक्तंसद्वा
दशंस्याद्दिवसप्रमाणं॥तदर्धंदिनभागानांसदापर्वपर्वणि॥ऋतुशेषंतुतद्वि णि
द्यात्संख्यायसहपर्वणां॥इत्युपायसमुद्देशोभूयोप्येनंप्रकल्पयेत्॥तेयरा
शिंगतांभ्यस्तान्विभजेन्यान्नराशिषु॥अग्निःप्रजापतिःसोमोरुद्रोदिति
बृहस्पतिः॥सर्पाश्चपितरश्चैवभगश्चैवार्यमापिच॥५॥सविताल्वष्टा
थवायुश्चेंद्राग्नीमित्रएवच॥इंद्रोनिर्ऋतिरापोवैविश्वेदेवास्तथैवच॥विष्णु
र्वसवोवरुणोजएकपात्तथैवच॥अहिर्बुध्न्यस्तथापूषाश्विनौयमएवच॥नक्ष
त्रदेवताएताएताभिर्यज्ञकर्मणि॥यजमानस्यशास्त्रज्ञैर्नामनक्षत्रजं

शि॰च॰ स्मृतं॥इत्येतन्मासवर्षाणांमुहूर्तोदयपर्वणां॥दिनर्त्वयनमासांगैर्व्याख्यातंल
७ गधेमाब्रवीत्॥सोमसूर्यस्त्रिचरितौलोकान्लोकेचसंमितं॥सोमसू
र्यस्त्रिचरितौविद्वान्वेदविदश्नुते॥६॥विषुवंतद्गुणंद्वाभ्यांरूपहीनंतु
षड्गुणं॥यल्लब्धंतानिपर्वाणितथोर्ध्वंसातिथिर्भवेत्॥माघशुक्लप्रवृत्त
स्तुपौषकृष्णसमापिनः॥युगस्यपंचवर्षाणिकालज्ञानंप्रचक्षते॥तृती
यांनवमींचैवपौर्णमासींत्रयोदशीं॥षष्ठींचविषुवांप्रोक्तोद्वादश्यांचस
मंभवेत्॥चतुर्दशीमुपवसथस्तथाभवेद्यथोदितोदिनमुपैतिचंद्रमाः
॥माघशुक्लाह्निकोयुंक्तेश्रविष्ठायांचवार्षिकीं॥यथाशिखामयूराणां राम
नागानांमणयोयथा॥तद्वद्वेदांगशास्त्राणांज्योतिषंमूर्धनिस्थितं॥ ७
वेदाहियज्ञार्थमभिप्रवृत्ताःकालानुपूर्वाविहिताश्चयज्ञाः॥तस्मा

दिदंकालविधानशास्त्रंयोज्योतिषंवेदसवेदयज्ञान्योज्योतिषंवेदसवेदयज्ञानि
ति॥७॥पंचसंवत्सरंप्रपद्येतैकार्याःकलादशाचयाःपर्वसविताविषुवंसह॥
॥ज्योतिषसमाप्तः॥ॐमयरसतजभनलगसंमितंभ्रमतिवाङ्मयंजग
तियस्य॥सजयतिपिंगलनागःशिवप्रसादिद्विशुद्धमतिः॥त्रिगुरुंविधि दा
मकारंलघ्वादिसमन्वितंयकाराख्यं॥लघुमध्यमंतुरेफंसकारमंतेगुरुनिब
द्धं॥लघ्वंसंहितकारंजकारमुभयोर्लघुंविजानीयात्॥आदिगुरुंचभकारं
नकारमिहपैंगलेत्रिलघुं॥दीर्घसंयोगपरंतथास्वरव्यंजनांतमूष्मांतं॥
सानुस्वारंचगुरुंक्वचिदवसानेपिलघ्वंत्यं॥आदिमध्यावसानेषुयरता
यांतिलाघवं॥भजसागौरवंयांतिमनौतुगुरुलाघवं॥भजसागौरवंयां

छंद तिमनौ तु गुरुलाघवं ॥ त्रिविरामं दशावर्णषण्मात्रमुवाच पिंगलः सूत्रं ॥ छंदोवर्गेप
१ दार्थप्रत्ययरूतोश्चशास्त्रादौ ॥ १ ॥ धीश्रीस्त्रीम् ॥ वरासाय् ॥ कागुहान् ॥ वसुधा
स् ॥ सातेक्कत् ॥ कदासज् ॥ किंवदभ् ॥ नहसन् ॥ ग्लल् ॥ गंते ॥ ध्वादिपरः ॥ हे ॥
लौसः ॥ ग्लौ ॥ अष्टौवसवइति ॥ २ ॥ प्रथमोध्यायः ॥ छंदः ॥ गायत्री ॥ दैव्येकं ॥
आसुरीपंचदश ॥ प्राजापत्याष्टौ ॥ यजुषांषट् ॥ साम्नांद्विः ॥ ऋचांत्रिः ॥ द्वौद्वौ
साम्नांवर्धेत ॥ त्रींस्त्रीनृचां ॥ चतुरश्चतुरः प्राजापत्यायाः ॥ एकैकंशेषे ॥ जत्या
दासुरी ॥ तान्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यः ॥ तिस्रस्तिस्रः सनाम्न्य राम
एकैकाब्राह्म्यः ॥ प्राग्यजुषामार्ष्यइति ॥ ३ ॥ द्वितीयोध्यायः ॥ पादः ॥ इयादि ८
पूरणः ॥ गायत्र्यावसवः ॥ जगत्या आदित्याः ॥ विराजोदिशः ॥ त्रिष्टुभो

रुद्राः ॥ एकद्वित्रिचतुष्पादुक्तपादं ॥ आद्यंचतुष्पादृतुभिः ॥ क्वचित्त्रिपादृषिभिः ॥
सापादनिचृत् ॥ षट्कसप्तकयोर्मध्येष्टावतिपादनिचृत् ॥ द्वौनवकोषट्कश्च
नागी ॥ विपरीतावाराही ॥ षट्कसप्तकाष्टकेर्वर्धमाना ॥ विपरीप्रतिष्ठा ॥ तृती ता
यंद्विपाज्जागतगायत्राभ्यां ॥ त्रिपात्त्रैष्टुभैः ॥ उष्णिग्गायत्रौजागतश्च ॥ ककुंमध्ये
चेदंत्यः ॥ पुरउष्णिक्पुरः ॥ ४ ॥ परोष्णिक्परः ॥ चतुष्पादृषिभिः ॥ अनुष्टुप्गायत्रैः ॥
त्रिपात्क्वचिज्जागताभ्यांच ॥ मध्येंतेच ॥ बृहतीजागतस्त्रयश्चगायत्राः ॥ प
थ्यापूर्वश्चेत्तृतीयः ॥ न्यंकुसारिणीद्वितीयः ॥ स्कंधोग्रीवीक्रौष्टुकेः ॥ उरोबृहतीया
स्कस्य ॥ उपरिष्टाद्बृहत्यंते ॥ पुरस्ताद्बृहतीपुरः ॥ क्वचिन्नवकाश्चत्वारः ॥ वैरा
जौगायत्रौच ॥ त्रिभिर्जागतैर्महाबृहतीति ॥ सतोबृहतीतांडिनः ॥ पंक्तिर्जागतौ

छंद गायत्रौ च ॥ पूर्वौ चेद्युजौ सतः पंक्तिः ॥ विपरीतौ च ॥ आस्तारपं
९ क्तिः परतः ॥ ५ ॥ प्रस्तारपंक्तिः पुरतः ॥ विष्टारपंक्तिरंततः ॥ संस्ता
रपंक्तिर्बहिः ॥ अक्षरपंक्तिः पंचकाश्चत्वारः ॥ द्वावप्यल्पशः ॥ प
दपंक्तिः पंच ॥ चतुष्कषट्कौ त्रयश्च ॥ पथ्यापंचभिर्गायत्रैः ॥ जगतीष
ड्भिः ॥ ९ एकेन त्रिष्टुप्ज्योतिष्मती ॥ तथा जगती ॥ पुरस्ताज्ज्योतिः प्रथमेन ॥
मध्येज्योतिर्मध्यमेन ॥ उपरिज्योतिरंत्येन ॥ ९ कस्मिन्पंचके छंदः शं ष्टा
कुमती ॥ षट्केक ककुम्मती ॥ त्रिपाद निष्ठमध्या पिपीलिकमध्या ॥ वि राम
परीता यवमध्या ॥ ऊनाधिकेनैकेन निचृद्भुरिजौ ॥ द्वाभ्यां विराट् ९
स्वराजौ ॥ आदितः संदिग्धे ॥ ६ ॥ देवतादितश्च ॥ अग्निः स

विता सोमो बृहस्पतिर्मित्रावरुणाविंद्रो विश्वेदेवा देवताः ॥ स्वराः षड्जऋषभ
गांधारमध्यमपंचमधैवतनिषादाः ॥ सितसारंगपिशंगकृष्णनीललो
हितगौरावर्णाः ॥ आग्निवेश्यकाश्यपगौतमांगिरसभार्गवकौशिकवा
सिष्ठानि गोत्राणि ॥ श्यामान्यतिछंदांसि ॥ रोचनाभाः कृतयः ॥ अनुक्ता
नां कामतो वर्णा इति ॥ ७ ॥ तृतीयोध्यायः ॥ चतुःशतमुत्कृतिः ॥ चतुरश्चतु
मि रस्त्यजेदुत्कृतेः ॥ तान्यें संव्याप्तिभ्यः कृतिः ॥ प्रकृत्या चोपसर्गवर्जितः ॥
धृत्यष्टिशक्करीजगत्यः ॥ पृथक्पृथक्पूर्वतऽ तान्येवैषां ॥ द्वितीयं
द्वितीयमतितः ॥ अथ लौकिकं ॥ आत्रैष्टुभाच्चयदार्षं ॥ पादश्चतुर्भा
गः ॥ पद्यावृत्तसमाप्तिर्वा ॥ लः समुद्रागणाः ॥ गौ गंतमध्यादिर्न्लश्च ॥

छंद १० स्वरा अर्धं चार्यार्धं ॥ अत्रायुङ्नज्र ॥ षष्ठोज्र ॥ न्लौ वा ॥ न्लौ चेत्पदं द्वि
तीयादि ॥ सप्तमः प्रथमादि ॥ अंत्ये पंचमः ॥ ८ ॥ षष्ठश्च ल ॥ त्रिषु ग
णेषु पादः पथ्यार्धे च ॥ विपुलान्या ॥ चपला द्वितीयचतुर्थौ ग्मध्ये जौ ॥
पूर्वे मुखपूर्वा ॥ जघनपूर्वेतरत्र ॥ उभयोर्महाचपला ॥ आद्यर्धसमा
गीतिः ॥ अंत्येनोपगीतिः ॥ उत्क्रमेणोद्गीतिः ॥ अर्धे वसुगण आर्यागी
तिः ॥ वैतालीयं द्विस्वरा अयुक्पादे युग्वसवोंते ल्गौ ॥ गोपछंदसिकं
॥ आपातलिका भ्गौ गर ॥ शेषे परेण युङ्न सार्कं ॥ षट् चामिश्रा युजि ॥ पंचमे राम
न पूर्वः साकं प्राच्यवृत्तिः ॥ आयुक्तृतीयेनोदीच्यवृत्तिः ॥ आभ्यां युग १०
पत्प्रवृत्तकं ॥ आयुक् चारुहासिनी ॥ ९ ॥ युगपरांतिका ॥ गंता द्विर्वस

यो मात्रा समकं ल्नवमः ॥ द्वादशश्च वानवासिका ॥ विश्लोकः पंचमाष्टमौ ॥ चित्रा
नवमश्च ॥ परयुक्तेनोपचित्रा ॥ एभिः पादाकुलकं ॥ गीत्यार्या लः ॥ शि
खाविपर्यस्तार्धा ॥ लः पूर्वश्चेज्ज्योतिः ॥ गश्चेत्सौम्या ॥ चूलिकैकोनत्रिंश
देकत्रिंशदंते ग्र ॥ साग्ये नन समा लांगल इति ॥ १० ॥ चतुर्थोध्यायः ॥ वृत्तं ॥
सममर्धसमर्धसमं विषमं च ॥ समं तावत्कृत्वः कृतमर्धसमं विष
मं च ॥ राश्यूनं ॥ त्रिति प्रमाणी ॥ वितानमन्यत्र ॥ पादस्यानुष्टुप्वक्त्रं ॥
न प्रथमात्स्नौ ॥ द्वितीयचतुर्थयोरश्च ॥ वान्यत्र ॥ यच्चतुर्थात् ॥ पथ्यायु
जो ज्र ॥ विपरीतैकीयं ॥ चपलायुजो न्र ॥ विपुला युग्लः सप्तमः ॥ सर्वतः
सैतवस्य ॥ भ्रौ न्तौ च ॥ प्रतिपादं चतुर्वृध्या पदं चतुरूर्ध्वं ॥ गावंत आपी
ग्लितिसमानी ॥

छंद उ:॥११॥गा वांदो चेत्सस्यापीउ:॥प्रस्यापीउो गा वांदो च॥प्रथमस्य विपर्यासे मंजरी लवल्य
११ मृतधारा:॥उद्गता भकतस्जेसस्लौ न्सोज्गोभ्गो ज्लोगस्जेसस्जेगर॥तृतीयस्य सोरभे नौ कं
भ्गौ॥ललितं नौसौ॥उपस्थितप्रचुपितं प्रथमगा घ म्सौज्भौ गोस्नौ ज्रौ ग्नौस्नौ जौ
य॥वर्धमानं तृतीये नौस्नौ न्सौ॥शुद्धविराडृषभं तज्रा:॥अर्धे॥उपचित्रकं सौ
स्लौ ग्भौ भौगर॥द्रुतमध्या भौ भौ ग्जौ ज्यौ॥वेगवती सौ सौ॥ भौ भौ गर॥
भद्रविराट् त्जौ गौ म्सौ जौ गर॥केतुमती स्जौ सौ॥भ्रौ न्गौ गर॥आख्यानकी तौ
जौ ग्त्तौ जौ गर॥विपरीताख्यानकी ज्तौ ज्तौ ग्तौ जौ गर॥हरिणप्लुता सौ स्लौ
२ न्भौ भ्रौ॥अपरवक्रं नौ र्लौ ग्न्जौ ज्रौ॥पुष्पिताग्रा नौ र्यौ न्जौ ज्रौ गर॥१२॥ राम
यवमती जौ र्जौ र्जौ ज्रौ ज्रौ गर॥शिखैवकां न त्रिंशद्दक त्रिंशादंते गर॥खंजाम ११

ज ह्रस्वयुजीति॥१३॥यतिर्विच्छेद:॥तनुमध्या त्यौ॥कुमारललिता ज्सौ गर॥
माणवकाक्रीडितकं भ्तौ ल्गौ॥चित्रपदा भौ गौ॥विद्युन्माला मौ गौ॥
भुजगशिशुभृता नौ म्र॥हलमुखी नौ स्रि॥शुद्धविराण्मसौ ज्गौ॥पणवो म्नौ
यौ॥रुक्मवती भ्मौ स्गौ॥मयूरसारिणी जौ गौ॥मत्ता म्भौ सौ॥उपस्थि
ता त्जौ ज्गौ॥एकरूपं सौ जौ गर॥इंद्रवज्रा तौ जौ गर॥उपेंद्रवज्रा ज्तौ
जौ गर॥वाद्यंतावुपजातय:॥दोधकं भ्भौ भौ गर॥शालिनी म्तौ तौ गस्
सुद्धकृषय:॥१४॥वातोर्मी म्भौ त्तौ गच॥भ्रमरविलसितं म्भौ न्लौ गर॥रथो
द्धता न्रौ र्लौ गर॥स्वागता न्रौ भौ गर॥वृत्ता नौ सौ गर॥श्येनी जौ र्लौ गर॥
जगती॥वंशस्था ज्तौ ज्रौ॥इंद्रवंशा तौ ज्रौ॥द्रुतविलंबितं न्भौ भ्रौ॥
तोटकं स:॥पुटो नौ म्यौ वसुसमुद्रा:॥जलोद्धतगति ज्सौ ज्सौ रसर्त

छंद व:।। भुजंगप्रयातं य:।। स्रग्विणी र:।। प्रमिताक्षरा स्जौ सौ।। वैश्वदेवी मौ
१२ यावि॑ंद्रियऋषय:।। नवमालिनी न्जौ भ्याविति।। १५।। षष्ठोध्याय:।। प्र
हर्षिणी म्नौ ज्रौ ग्त्रिकदशकौ।। रुचिरा ज्भौ स्जौ ग्समुद्रनवकौ।। म
धा त्तमयूरा म्तौ य्सौ ग्र।। असंबाधा म्तौ न्सौ गा विंद्रियनवकौ।। अपरा
जिता न्नौ सौ ल्गौ स्वरऋषय:।। प्रहरणकलिता नौ भ्नौ ल्गौ च।। व
संततिलका त्भौ जौ गौ।। सिंहोन्नता काश्यपस्य।। उद्धर्षिणी सैत
वस्य।। चंद्रावर्ता नौ नौ स्।। माला र्तुनवकौ चेत्।। मणिगुणनिकरो
वस्वृषय:।। मालिनी नौ म्यौ य्च।। ऋषभगजविलसितं भ्रौ नौ राम
नौ स्वरनवकौ।। हरिणी न्सौ म्रौ स्लौ ग्रससमुद्रऋषय:।। पृथिवी १२
ज्सौ ज्सौ य्लौ ग्वसुनवकौ।। वंशपत्रपतितं भ्रौ न्भौ न्लौ ग्दिगृषय:।।

मंदाक्रांता म्भौ न्तौ तौ ग्समुद्रर्तुस्वरा:।। शिखरिणी य्मौ न्सौ भ्लौ ग्रुतु
रुद्रा:।। कुसुमितलतावेल्लिता म्तौ न्यौ याविंद्रियर्तुस्वरा:।। १६।। शा
डि र्दूलविक्रीडितं म्सौ ज्सौ तौ गादित्यऋषय:।। सुवदना म्रौ भ्नौ य्भौ ल्गौ
स्वरर्षिरसा:।। गिति वृत्तं।। स्रग्धरा म्रौ भ्नौ यौ यात्रि: सप्तका:।।
मद्रकं भ्रौ नौ नौ न्गौ दिगादित्या:।। अश्वललित न्जौ भ्जौ भ्जौ भ्लौ
गुद्रादित्या:।। मत्ताक्रीडा मौ त्नौ नौ न्लौ ग्वसुपंचदशकौ।। तन्वी भ्तौ
न्सौ भौ न्यौ द्विरादित्या:।। क्रौंचपदा भ्मौ स्भौ नौ नौ न्गौ भूतेंद्रियव
स्वृषय:।। भुजंगविजृंभितं मौ त्नौ नौ र्सौ ल्गौ वसुरुद्रऋषय:।। अ
पवाहको म्नौ नौ नौ न्सौ गौ नवकर्तुरसेंद्रियाणि।। दंडको नौ र:।। प्रथ

छंद मश्वं उद्दिष्टे प्रयातः ॥ अन्यत्र रातमौ उव्याभ्यां ॥ शेषः प्रचित इति ॥ १७
१३ अत्रानुक्तं गाथा ॥ द्विकौ ग्लौ ॥ मिश्रौ च ॥ पृथग्लामिश्राः ॥ वसवस्त्रि
काः ॥ लर्धे ॥ सैके ग ॥ प्रतिलोमगुणं द्विर्लाद्यं ॥ ततोऽग्येकं जह्या
त् ॥ द्विरर्धे ॥ रूपे शून्यं ॥ द्विः शून्ये ॥ तावदर्धे तद्गुणितं ॥ द्विर्द्व्यूनं ॥
तदंतानां ॥ एकोनेध्वा ॥ परे पूर्णं परे पूर्णमिति ॥ १८ ॥ अष्टमोऽध्यायः ॥
भयद्वादशाध्यायीः पंचदशछंदः षोडश पादः परो द्विकौ प्रस्तारपंक्तिर्विं
शतिर्विंशतिरेकविंशतिर्देवतादितो द्वे चतुःशतं षष्ठो विंशति
विंशति युगपरांति कौत्रयोदशाद्युक्तं गावादो विंशतिर्विंशतिर्यव राम
मती श्रीपोपाति विंशतिर्वी तोमर मष्टादशप्रहर्षिणी विंशतिः शार्दू १३
लविक्रीडितं पंचदशानुक्तं सप्तदशाष्टादश ॥ छंदसमाप्तः ॥

ॐ ॥ गौः । ग्मा । ज्मा । क्ष्मा । क्षा । क्षमा । क्षोणी । क्षितिः । अवनिः । उर्वी । पृथ्वी । मही । रिपः ।
अदितिः । इळा । निर्ऋतिः । भूः । भूमिः । पूषा । गातुः । गोत्रेत्येकविंशतिः पृथिवीना
मधेयानि ॥ १ ॥ हेम । चंद्रं । रुक्मं । अयः । हिरण्यं । पेशः । कृशनं । लोहं । कनकं ।
कांचनं । भर्म । अमृतं । मरुत् । दत्रं । जातरूपमिति पंचदश हिरण्यनामानि ॥ २ ॥
अंबरं । वियत् । व्योम । बर्हिः । धन्व । अंतरिक्षं । आकाशं । आपः । पृथिवी । भूः ।
स्वयंभूः । अध्वा । पुष्करं । सगरः । समुद्रः । अध्वरमिति षोडशांतरिक्षनामानि ।
॥ ३ ॥ स्वः । पृश्निः । नाकः । गौः । विष्टप् । नभ इति षट् साधारणानि ॥ ४ ॥ खेदयः ।
किरणाः । गावः । रश्मयः । अभीशवः । दीधितयः । गभस्तयः । वनं । उस्राः । व
सवः । मरीचिपाः । मयूखाः । सप्त ऋषयः । साध्याः । सुपर्णा इति पंचदश रश्मि

निघंट नामानि ॥ ५ ॥ आताः । आशाः । उपराः । आष्ठाः । काष्ठाः । व्योम । ककुभः । हरित
१४ इत्यष्टौ दिङ्नामानि ॥ ६ ॥ श्यावी । क्षपा । शर्वरी । अक्तुः । ऊर्म्या । राम्या । यम्या ।
नम्या । दोषा । नक्ता । तमः । रजः । असिक्नी । पयस्वती । तमस्वती । घृताची । शि
रिणा । मोकी । शोकी । ऊधः । पयः । हिमा । वस्वीति त्रयोविंशती रात्रिनामा
व नि ॥ ७ ॥ विभावरी । सूनरी । भास्वती । ओदती । चित्रामघा । अर्जुनी । वा
जिनी । वाजिनीवती । सुम्नावरी । अहना । द्योतना । श्वित्या । अरुषी ।
सूनृता । सूनृतावती । सूनृतावरीति षोडशोषानामानि ॥ ८ ॥ वस्तोः । राम
द्युः । भानुः । वासरं । स्वसराणि । घ्रंसः । घर्मः । घृणः । दिनं । दिवा । दिवेदि १४
वे । द्यवि । द्यवीति द्वादशाहर्नामानि ॥ ९ ॥ अद्रिः । ग्रावा । गोत्रः । वलः ।

अश्नः । पुरुभोजाः । वलिशानः । अश्मा । पर्वतः । गिरिः । व्रजः । चरुः । वराहः ।
शंबरः । रौहिणः । रैवतः । फलिगः । उपरः । उपलः । चमसः । अहिः । अभ्रं ।
बलाहकः । मेघः । दृतिः । ओदनः । वृषंधिः । वृत्रः । असुरः । कोशइति त्रिं
शन्मेघनामानि ॥ १० ॥ श्लोकः । धारा । इळा । गौः । गौरी । गांधर्वी । गभीरा ।
गंभीरा । मंद्रा । मंद्राजनी । वाशी । वाणी । वाणीची । वाणः । पविः । भारती । ध
मनिः । नाळीः । मेळिः । मेना । सूर्या । सरस्वती । निवित् । स्वाहा । वग्नुः ।
उपब्दिः । मायुः । काकुत् । जिह्वा । घोषः । स्वरः । शब्दः । स्वनः । ऋक् ।
होत्रा । गीः । गाथा । गणः । धेना । ग्नाः । विपा । नना । कशा । धिषणा । नौः ।
अक्षरं । मही । अदितिः । शची । वाक् । अनुष्टुप् । धेनुः । वल्गुः । गल्दा ।

निघंट १ १९

सरः।ऽस्कपूर्णी। बेकुरेतिसप्तपंचाशद्वाङ्नामानि॥ ११॥ अर्णः।क्षो
दः।क्षद्म।नभः।अंभः।कबंधं।सलिलं।वाः।वनं।घृतं।मधु।पुरी
षं।पिप्पलं।क्षीरं।विषं।रेतः।कशः।जन्म।बृबूकं।बुसं।तुग्र्या।ब
र्बुरं।सुक्षेम।धरुणं।सुरा।अररिंदानि।ध्वस्मन्वत्।जामि।आयुधा
नि।क्षपः।अहिः।अक्षरं।स्रोतः।तृप्तिः।रसः।उदकं।पयः।सरः।भे
षजं।सहः।शवः।यहः।ओजः।सुखं।क्षत्रं।आवयाः।शुभं।यादुः।
भूतं।भुवनं।भविष्यत्।आपः।महत्।व्योम।यशः।महः।सर्णीकं।स्वृ
तीकं।सतीनं।गहनं।गभीरं।गंभरं।ईं।अन्नं।हविः।सद्म।सदनं। १९
ऋतं।योनिः।ऋतस्य योनिः।सत्यं।नीरं।रयिः।सत्।पूर्णं।सर्वं।

अक्षितं।बर्हिः।नाम।सर्पिः।अपः।पवित्रं।अमृतं।इंदुः।हेम।स्वः।
सर्गाः।शंबरं।अभ्वं।वपुः।अंबु।तोयं।तूयं।कृपीटं।शुक्रं।तेजः।
स्वधा।वारि।जलं।जलाषं।इदमित्येकशतमुदकनामानि॥ १२॥
अवनयः।यव्याः।खाः।सीराः।स्रोत्याः।एन्यः।धुनयः।रुजानाः।
वक्षणाः।खादोअर्णाः।रोधचक्राः।हरितः।सरितः।अग्रुवः।
नभन्वः।वध्वः।हिरण्यवर्णाः।रोहितः।सस्रुतः।अर्णाः।सिंधवः।
कुल्याः।वर्यः।उर्व्यः।इरावत्यः।पार्वत्यः।स्रवंत्यः।ऊर्जस्वत्यः।पयस्व
त्यः।तरस्वत्यः।सरस्वत्यः।हरस्वत्यः।रोधस्वत्यः।भास्वत्यः।अजिराः।
मातरः।नद्य इति सप्तत्रिंशन्नदीनामानि॥ १३॥ अत्यः।हयः।अ

निघंट१ १६ वी।वाजी।सप्तिः।वह्निः।दधिक्राः।।दाधिक्रावा।एतग्वः।एतशः।पैद्वः।दौर्गहः।
औच्चैश्रवसः।तार्क्ष्यः।आशुः।ब्रध्नः।अरुषः।मांश्चत्वः।अव्यथयः।श्येनासः।सुप
र्णाः।पतंगाः।नरः।ह्रार्याणां।हंसासः।अश्वाइतिषड्विंशतिरश्वनामानि॥ १४॥
हरीइंद्रस्य।रोहितोग्नेः।हरितआदित्यस्य।रासभावश्विनोः।अजाःपूष्णः।पृ
षत्योमरुतां।अरुण्योगावउषसां।श्यावाःसवितुः।विश्वरूपाबृहस्पतेः।नि
युतोवायोरितिदशादिष्टोपयोजनानि॥ १५ ॥भ्राजते।भ्राशते।भ्राश्यति।
मंदते। दीदयति।शोचति।मंदते।रोचते।ज्योतते।द्योतते।इत्येकादशज्वलति
कर्माणः॥ १६ ॥जमत्।कल्मलीकिनं।जंजणाभवन्।मल्मलाभवन्।अर्चिः।शो रुम
चिः।तपः।तेजः।हरः।हृणिः।शृंगाणिशृंगाणीत्येकादशज्वलतोनामधेयानि॥ १६
॥ १७ ॥गोर्हेमांबरंस्वः१खेदयुआताश्यावीविभावरीवस्तोरदिःश्लोकोर्णी

वनयोस्योलरीइंद्रस्यभ्राजतेजमदितिसप्तदश।।प्रथमोध्यायः।।[illegible]।अपः।अ
प्नः।दंसः।वेषः।वेपः।विष्टी।व्रतं।कवरं।करूपं।शक्म।क्रतुः।करणानि।करांसि।
करिक्रत्।करंती।चक्रत्।कर्त्वं।कर्तोः।कर्तवे।कृत्वी।धीः।शची।शमी।शिमी।श
क्तिः।शिल्पमितिषड्विंशतिः कर्मनामानि॥ १ ॥तुक्।तोकं।तनयः।तोक्म।त
क्म।शेषः।अप्नः।गयः।जाः।अपत्यं।यहुः।सूनुः।नपात्।प्रजा।बीजमितिपं
चदशापत्यनामानि॥ २ ॥मनुष्याः।नरः।धवा।जंतवः।विशः।क्षितयः।कृ
ष्टयः।चर्षणयः।नहुषः।हरयः।मर्याः।मर्त्याः।मर्ताः।व्राताः।तुर्वशाः।द्रुह्य
वः।आयवः।यदवः।अनवः।पूरवः।जगतः।तस्थुषः।पंचजनाः।विवस्वंतः।
पृतनाइतिपंचविंशतिर्मनुष्यनामानि॥ ३ ॥आयती।च्यवाना।अभीशू।
अप्नवाना।विनंगृसौ।गभस्ती।करस्नौ।बाहू।भुरिजौ।क्षिपस्ती।शक्वरी।

भरित्रेइतिदशबाहुनामानि ॥ ४ ॥ अग्रुवः । अण्व्यः । क्षिपः । विशः । शार्याः । र
शनाः । धीतयः । अथर्यः । विपः । कक्ष्याः । अवनयः । हरितः । स्वसारः ।
जामयः । सनाभयः । योक्त्राणि । योजनानि । धुरः । शाखाः । अभीशवः । दी
धितयः । गभस्तयइतिद्वाविंशतिरंगुलिनामानि ॥ ५ ॥ वश्मि । उश्म
सि । वेति । वेनति । वेसति । वांछति । वष्टि । वनोति । जुषते । हर्यति । आच
के । उशिक् । मन्यते । छंत्सत् । चाकनत् । चकमानः । कनति । कानि
षदित्यष्टादशकांतिकर्माणः ॥ ६ ॥ अंधः । वाजः । पयः । श्रवः । पृक्षः ।
पितुः । सुतः । सिनं । अवः । क्षु । धासिः । इरा । इळा । इषं । ऊर्क् । रसः ।
स्वधा । अर्कः । क्षद्म । नेमः । ससं । नमः । आयुः । सूनृता । ब्रह्म । व

र्चः । कीलालं । यशइत्यष्टाविंशतिरन्ननामानि ॥ ७ ॥ आवयति । भवीति । बभ
स्ति । वेति । वेवेष्टि । अविष्यन् । बप्सति । भसथः । बब्धां । ह्वरतीतिदशात्तिक
र्माणः ॥ ८ ॥ ओजः । पाजः । शवः । तवः । तरः । त्वक्षः । शर्धः । बाधः । नृम्णं ।
तविषी । शुष्मं । शुष्णं । दक्षः । वीळु । च्यौत्नं । शूषं । सहः । वधः । वर्गः । वृजनं । यहः
वृक् । मज्मना । पौंस्यानि । धर्णसिः । द्रविणं । स्पंद्रासः । शंबरमित्यष्टाविंशति
र्बलनामानि ॥ ९ ॥ मघं । रेक्णः । रिक्थं । वेदः । वरिवः । श्वात्रं । रत्नं । रयिः । क्ष
त्रं । भगः । मीळ्हुं । गयः । द्युम्नं । इंद्रियं । वसु । रायः । राधः । भोजनं । तना । नृम्णं ।
बंधुः । मेधा । यशः । ब्रह्म । द्रविणं । श्रवः । वृत्रं । ऋतमित्यष्टाविंशतिरेवधनना
मानि ॥ १० ॥ अघ्न्या । उस्रा । उस्रिया । अही । मही । अदितिः । इळा ।

जगती। शक्करीतिनवगोनामानि॥ ११॥ रेळते। हेळते। भामते। भृणीयते।
श्रीणाति। त्रेषति। दोधति। वनुष्यति। कंपते। भोजत इति दश क्रुध्यतिकर्मा
णः॥ १२॥ हेळः। हरः। हृणिः। त्यजः। भामः। एहः। ह्वरः। तपुषी। जूर्णिः। मन्युः। व्य
थिरित्येकादश क्रोधनामानि॥ १३॥ वर्तते। अयते। लोटते। लोठते। स्यंदते।
कसति। सर्पति। स्यमति। स्रवति। स्रंसते। अवति। श्चोतति। ध्वंसति। वे
नति। मार्ष्टि। भुरण्यति। शवति। काल्यति। पेल्पति। कंटति। पिस्यति।
बिस्यति। मिस्यति। प्रवते। प्लवते। च्यवते। कवते। गवते। नवते। क्षोद
ति। नक्षति। सक्षति। म्यक्षति। सचति। ऋच्छति। तुरीयति। चतति। अत
ति। गाति। इयक्षति। सश्चति। सरति। रंहति। यतते। भ्रमति। ध्रजति।
रजति। लजति। क्षियति। धमति। मिनाति। ऋण्वति। ऋणोति। स्वरति।

सिसर्ति। वेविष्टि। योविष्टि। रिणाति। रीयते। रेजति। दघ्यति। दभ्नोति।
युध्यति। धन्वति। अरुषति। आर्यति। ऊयते। तकति। दीयति। ईष
ति। फणति। हनति। अर्दति। मर्दति। सस्र्ते। नसते। हर्यति। इयर्ति।
ईर्तै। ईंखते। ज्रयति। श्वात्रति। गंति। आगनीगंति। जंगंति। जिन्व
ति। जसति। गमति। ध्रति। ध्राति। ध्रयति। वहते। रथर्यति। जेह
ते। घः केति। स्कंपति। स्पाति। वाति। याति। इषति। इयाति। ढूकति। ए
जति। जमति। जवति। वंचति। अनिति। पवते। हंति। सेधति। अगन्।
अजगन्। जिगाति। पतति। इन्वति। इमति। इवति। वेति। हर्यता
त्। एति। जगा्। यात्। अयुशुरिति द्वाविंशं शतं गतिकर्माणः॥ १४॥

निघंट २ नु। मक्षू। द्रवत्। ओषं। जीराः। जूर्णिः। शूर्ताः। शूघनासः। शीभं। तृषु। तूयं। तू
१९ र्णिः। अजिरं। भुरण्युः। शु। प्राशुः। तूतुजिः। तूतुजानः। तुज्यमानासः। अज्राः। आशु।
साचीवित्। द्युगत्। ताजत्। तरणिः। वातरंहाइतिषड्विंशतिः क्षिप्रनामानि॥ १५॥
तुकित्। आसात्। अंबरं। तुर्वशे। अस्तमीके। आके। उपाके। अर्वाके। अंतमा
नां। अवमे। उपमइत्येकादशांतिकनामानि॥ १६॥ रणः। विवाक्। विखादः। नद
नुः। भरे। आक्रंदे। आहवे। आजौ। पृतनाज्यं। अभीके। समीके। ममसत्यं। नेमधि
ता। संकाः। समितिः। समनं। मीळ्हे। पृतनाः। स्पृधः। मृधः। पृत्सु। समत्सु। समर्ये।
समरणे। समोहे। समिथे। संखे। संगे। संयुगे। संगथे। संगमे। वृत्रतूर्ये।
पृक्षे। आणौ। शूरसातौ। वाजसातौ। समनीके। खले। खजे। पौंस्ये। महाध १९
ने। वाजे। अज्म। सद्म। संयत्। संवतइतिषट्चत्वारिंशत्संग्रामनामानि॥ १७॥

इन्वति। नक्षति। आक्षाणः। आनट्। आष्ट। आपानः। अशत्। नशत्। आनशे। अश्नु
तइतिदशव्याप्तिकर्माणः॥ १८॥ दभ्नोति। श्नथति। ध्वरति। धूर्वति। वृणक्ति। वृश्च
ति। कृणवति। कृंतति। श्वसिति। नभते। अर्दयति। स्तृणाति। स्नेहयति। यातयति।
स्फुरति। स्फुलति। निर्वपंतु। अवतिरति। वियातः। आतिरत्। तकित्। आखंडल।
दृणाति। रम्णाति। श्रृणाति। शम्नाति। तृणेढि। ताढि। नितोशते। निबर्हयति। मि
नोति। मिनोति। धमतीतित्रयस्त्रिंशद्वधकर्माणः॥ १९॥ दिद्युत्। नेमिः। हेतिः।
हर्के। नमः। पविः। सृकः। वधः। वज्रः। अर्कः। कुत्सः। कुलिशः। तुंजः। तिग्मः। मेनिः। स्वधितिः।
सायकः। परशुरित्यष्टादशवज्रनामानि॥ २०॥ इरज्यति। पत्यते। क्षयति। रा
जतीतिचत्वारऐश्वर्यकर्माणः॥ २१॥ राष्ट्री। अर्यः। नियुत्वान्। इनइनइतिच

निघंटर सारीश्वरनामानि ॥ २२ ॥ अपस्तुष्क्षनुष्या आयुत्यं । खु वोन इमंसधुआ
२० जै वेयस्त्योमघमध्यारेकेतेहो क्षावृतंतेनुतकिद्दणुइन्वेतिदम्नोतिदि
घदिरज्यतिराष्ट्रीद्वाविंशतिः ॥ द्वितीयोध्यायः ॥ ॐ ॥ उरु । तुवि । पुरु ।
भूरि । शश्वत् । विश्वं । परीणसा । व्यानशिः । शतं । सहस्रं । सलिलं । कु
विदितिद्वादशबहुनामानि ॥ १ ॥ ऋहन्न । ह्रस्वः । निघृष्टः । मायुकः ।
प्रतिष्ठा । क्रधु । वम्रकः । दभ्रं । अर्भकः । क्षुल्लकः । अल्पइत्येकाद
शह्रस्वनामानि ॥ २ ॥ महत् । ब्रध्नः । ऋष्वः । बृहत् । उक्षितः । तवसः ।
। तविषः । महिषः । अभ्वः । ऋभुक्षाः । उक्षा । विहायाः । यह्वः । ववक्षि २०
थ । विवक्षिथ । विवक्षसे । अंभृणः । माहिनः । गभीरः । ककुहः ।
ककुहः ।

व्राधन् । विरप्शी । अद्भुतं । बर्हिष्ठः । बर्हिषदितिपंचविंशतिर्महन्नामानि ॥ ३ ॥
गयः । कृदरः । गर्तः । हर्म्यं । अस्तं । पस्त्यं । दुरोणे । नीळं । दुर्याः । स्वसराणि ।
अमा । दमे । कृत्तिः । योनिः । सद्म । शरणं । वरूथं । छर्दिः । छदिः । छाया ।
शर्म । अज्मेतिद्वाविंशतिर्गृहनामानि ॥ ४ ॥ इरज्यति । विधेम । सपर्य
ति । नमस्यति । दुवस्यति । ऋध्नोति । ऋणद्धि । ऋच्छति । सपति । विवासती
तिदशपरिचरणकर्माणः ॥ ५ ॥ शिंबाता । शतरा । शातपंता । शिलगुः । स्यू
मकं । शेवृधं । मयः । सुग्म्यं । सुदिनं । शूषं । शुनं । शग्मं । भेषजं । जलाषं ।
स्योनं । सुम्नं । शेवं । शिवं । शं । कमितिविंशतिः सुखनामानि ॥ ६ ॥ निर्णि
क् । वव्रिः । वर्पः । वपुः । अमतिः । अप्सः । प्सु । अप्नः । पिष्टं । पेशः । कृशनं । म

रुशत।अर्जुनं।ताम्रं।अरुषं।शिल्पमितिषोडशरूपनामानि॥७॥अस्रेमा।अ
नेमा।अनेद्यः।अनवद्यः।अनभिशस्यः।उक्थ्यः।सुनीथः।पाकः।वामः।
वयुनमितिदशप्रशस्यनामानि॥८॥केतुः।केतः।चेतः।चित्तं।क्रतुः।
असुः।धीः।शची।माया।वयुनं।अभिख्येत्येकादशप्रज्ञानामानि॥९॥
बट्।श्रत्।सत्रा।अद्धा।इत्था।ऋतमितिषट्सत्यनामानि॥१०॥चिक्य
त्।चाकनत्।अचष्ट।चष्टे।विचष्टे।विचर्षणिः।विश्वचर्षणिः।अवचाक
शदित्यष्टौपश्यतिकर्माणः॥११॥हिकं।नुकं।सुकं।आहिकं।आकीं।
नकिः।माकिः।नकीं।आकृतमितिनवोत्तराणिपदानिसर्वपदसमाम्ना
नाय॥१२॥इदमिव।इदंयथा।अग्निर्नये।चतुरश्चिद्ददमानात्।ब्राह्मणा

व्रतचारिणः।वृक्षस्यनुतेपुरुहूतवयाः।जारआभगं।मेषोभूतोऽभियंनयः।
तद्रूपः।तद्वर्णः।तद्वत्।तथेत्युपमाः॥१३॥अर्चति।गायति।रेभति।स्तोभ
ति।गूर्धयति।गृणाति।जरते।ह्वयते।नदति।पृच्छति।रिहति।धमति।कृपायति।
कृपण्यति।पनस्यति।पनायते।वल्गूयति।मंदते।भंदते।छंदति।छदयति।शश
मानः।रंजयति।रजयति।शंसति।स्तौति।यौति।रौति।नौति।भनति।पणाय
ति।पणते।सपर्यति।पपृक्षाः।महयति।वाजयति।पूजयति।मन्यते।मदति।
रसति।स्वरति।वेनति।मंद्रयते।जल्पतीतिचतुश्चत्वारिंशदर्चतिकर्माणः॥
॥१४॥विप्रः।विग्रः।गृत्सः।धीरः।वेनः।कण्वः।ऋभुः।नवेदाः।कविः।मनीषी। वेधाः।
संधाता।विधाता।विपः।मनश्चित्।विपश्चित्।विपन्यवः।आकेनिपः।उ

शिजः।कीस्तासः।अस्थातायः।मतयः।मतुथाः।वाघतइतिचतुर्विं
शतिर्मेधाविनामानि॥१५॥रेभः।जरिता।कारुः।नदः।स्तामुः।की
रिः।गौः।सूरिः।नादः।छंदः।स्तुप्।रुद्रः।कृपण्युरितित्रयोदशस्तोतृ
नामानि॥१६॥यज्ञः।वेनः।अध्वरः।मेधः।विदथः।नार्यः।सवनं।होत्रा।इष्टिः।
देवताता।मखः।विष्णुः।इंदुः।प्रजापतिः।घर्मइतिपंचदशयज्ञनामा
नि॥१७॥भरताः।कुरवः।वाघतः।वृक्तबर्हिषः।यतस्रुचः।मरुतः।सबाधः।
देवयवइत्यष्टावृत्विङ्नामानि॥१८॥ईमहे।यामि।मन्महे।दद्धि।शग्धि।
पूर्धि।मिमिड्ढि।मिमीहि।रिरिड्ढि।रिरीहि।पीपरत्।यंतारः।यंधि।इषुध्य
ति।मदेमहि।मनामहे।मायतइतिसप्तदशयाच्ञाकर्माणः॥१९॥दाति। २२
दाशति।दासति।राति।रासति।पृणक्षि।पृणाति।शिक्षति।तुंजति।मंहत

इतिदशदानकर्माणः॥२०॥परिस्रव।पवस्व।अभ्यर्ष।आशिषइतिचत्वारो
ध्येषणाकर्माणः॥२१॥स्वपिति।सस्तीतिद्वौस्वपितिकर्माणौ॥२२॥कूपः।कातुः।
कर्तः।वव्रः।काटः।खातः।अवतः।क्रिविः।सूदः।उत्सः।ऋश्यदात्।कारोतरा
त्।कुशयः।केवटइतिचतुर्दशकूपनामानि॥२३॥तृपुः।तक्वा।रिभ्वा।
रिपुः।रिक्वा।रिहायाः।तायुः।तस्करः।वनर्गुः।हुरश्चित्।मुषीवान्।मलि
म्लुचः।अघशंसः।वृकइतिचतुर्दशैवस्तेननामानि॥२४॥निण्यं।सस्वः।
सनुतः।हिरुक्।प्रतीच्यं।अपीच्यमितिषण्णिर्णीतांतर्हितनामधेयानि॥२५॥
आके।पराके।पराचैः।आरे।परावतइतिपंचदूरनामानि॥२६॥प्रत्नं।प्रदिवः।
प्रवयाः।सनेमि।पूर्व्यं।अह्नायेतिषट्पुराणनामानि॥२७॥नवं।नूत्नं।

नूतनं। नव्यं। इदा। इदानीमिति षट्नवनामानि॥ २८॥ प्रपित्वे। अभीके। दभ्रं।
अर्भकं। तिरः। सतः। त्वः। नेमः। ऋक्षाः। स्तृभिः। वम्रीभिः। उपजिह्विका। ऊर्द
रं। कृदरं। रंभः। पिनाकं। मेना। ग्नाः। शेपः। वैतसः। अया। एना। सिषक्तु। सच
ते। भ्यसते। रेजत इति षड्विंशतिर्द्विशः उत्तराणि नामानि॥ २९॥ स्वधे।
पुरंधी। धिषणे। रोदसी। क्षोणी। अंभसी। नभसी। रजसी। सदसी। सद्म
नी। घृतवती। बहुले। गभीरे। गंभीरे। ओण्यौ। चम्वौ। पार्श्वौ। मही। उर्वी।
पृथ्वी। अदिती। अह्नी। दूरेऽअंते। अपारे अपारे इति चतुर्विंशति द्यावापृ
थिव्योर्नामधेयानि॥ ३०॥ उरुं १ हन्मह द्रुयस्र रज्यति शिंबा तानिर्णिगस्व २३
माकेर्बर्ट् (तु) चिक्यस्थिकमिदमिवाचेति विप्रोरेभोयज्ञोभरतार्इमेहदातिप

रिस्थवृस्वपिति कूपस्तृपुर्निण्यमाके पूर्व्यं नवं प्रपित्वे स्वधे त्रिंशत॥ तृती
योध्यायः॥ ॐ॥ जहा। निधा। शितामं। मेहना। दमूनाः। मूषः। इषिरेण।
कुरुतन। जठरे। तितउ। शिप्रे। मध्या। मंदू। ईर्मांतासः। कायमानः। लोधं।
शीरं। विद्रधे। दुपदे। तुग्वनि। नंसंते। नसंतेः। आहनसः। अश्वसत्। इषिणः।
वालेः। परितक्म्या। सुविते। दयते। नूचित्। नूच। दावने। अकूपारस्य। शिशी
ते। सुतुकः। सुप्रायणाः। अप्रायुवः। च्यवनः। रजः। हरः। जुहुरे। व्यंतः। कीणाः।
वाशी। विषुणः। जामिः। पिता। शंयोः। अदितिः। एरिरे। जसुरिः। जरते। मंदिने। गौः।
गातुः। दंसयः। तूताव। चयसे। वियुते। ऋधक्। अस्याः। अस्य इति द्विषष्टिः प
दानि॥ १॥ सस्निं। वाहिष्ठः। दूतः। वावशानः। वार्यं। अंधः। असश्चंती। वनु

ष्यति। तरुष्यति। मंदनाः। आहनः। नदः। सोमो। अक्षाः। श्वात्रं। ऊतिः। हासमाने।
पद्भिः। ससंशिता। ग्राः। वराहः। स्वसराणि। शर्याः। अर्कः। पविः। वक्षः। धन्व। सिनं। इ
त्था। सचा। चित्। आ। द्युम्नं। पवित्रं। तोदः। स्वंचाः। शिपिविष्टः। विष्णुः। आघृणिः।
पृथुज्रयाः। अथर्युं। काणुका। अध्रिगुः। आंगूषः। आपांतमन्युः। श्मशा। उर्वशी।
वयुनं। वाजपस्त्यं। वाजगंध्यं। गध्यं। गधिता। कौरयाणः। तौरयाणः। अह्रया
णः। हरयाणः। आरितः। व्रंदी। निःषपी। तूर्णाशं। क्षुंपं। निचुंपुणः। पदिं। पादुः।
वृकः। जोषवाकं। कृत्तिः। श्वघ्नी। समस्य। कुटस्य। चर्षणिः। शंबः। केपयः। तू
तुमाकृषे। अंसत्रं। काकुदं। बीरिटं। अच्छ। परि। ईं। सीं। एनं। एनां। सृणि राम
रिति चतुरुत्तरमशीतिः पदानि ॥ २ ॥ आशुशुक्षणिः। आशाभ्यः। का २४
शिः। कुणारुः। अलातृणः। सलल्कं। कस्पयं। विस्रुहः। वीरुधः। नक्षद्दाभं।

अस्कृधोयुः। निशृंभाः। बृबदुक्थं। ऋदूदरः। ऋदूपे। पुलुकामः। असि
न्वती। कपना। भार्ऋजीकः। रुजानाः। जूर्णिः। ओमना। उपलप्रक्षिणी।
उपसि। प्रकलवित्। अभ्यर्धयज्वा। ईक्षे। क्षोणस्य। अस्मे। पाथः। सवी
मनि। सप्रथाः। विदथानि। श्रायंतः। आशीः। अजीगः। अमूरः। शशमा
नः। देवो देवाच्या कृपा। विजामातुः। ओमासः। सोमानं। अनेवायं। कि
मीदिने। अमवान्। अमीवा। दुरितं। अप्वा। अमतिः। श्रुष्टी। पु
रंधिः। रुशत्। रिशादसः। सुदत्रः। सुविदत्रः। आनुषक्। तुर्वणिः। गि
र्वणसे। असूर्ते सूर्ते। अम्यक्। यादृश्मिन्। जारयायि। अग्रिया।
चनः। पचता। शुरुधः। अमिनः। जज्झतीः। अप्रतिष्कुतः। शाशदानः।

निघंट ४ सृप्रः। सुशिप्रः। शिप्रे। रंसु। द्विबर्हाः। अक्रः। उराणः। स्तियानां। स्तिपाः। जबारु।
२९ जरूथं। कुलिशः। तुंजः। बर्हणा। ततनुष्टिं। इली। बिशः। क्रियेधाः। भृमिः। विष्पि
तः। तुरीपं। रास्पिनः। ऋंजतिः। ऋजुनीती। प्रतद्वसू। हिनोत। चोष्कूयमाणः।
चोष्कूयते। सुमत्। दिविष्टिषु। दूतः। जिन्वति। अमत्रः। ऋचीषमः। अनर्श
रातिं। अनर्वा। असामि। गल्दया। जल्हवः। बकुरः। बेकनाटान्। अभि
धेतन। अंहुरः। बतः। वाताप्यं। चाकन्। रथर्यति। असश्चां। आधवः। अनव
ब्रवः। सदान्वे। शिरिंबिठः। पराशरः। क्रिविर्दती। करूळती। दनः। शरारुः।
इदंयुः। कीकटेषु। बुंदः। वृंदं। किः। उल्बं। ऋबीसम्बीसमितित्रयस्त्रिं २९
शच्छतंपदानि॥ ३॥ जहासस्निमाशुंसेणिस्त्रीणि॥ चतुर्थोध्यायः॥
सु

ॐ नमः॥ अग्निः। जातवेदाः। वैश्वानर इति त्रीणिपदानि॥ १॥ द्रविणोदाः।
इध्मः। तनूनपात्। नराशंसः। इळः। बर्हिः। द्वारः। उषासानक्ता। दैव्याहोता
रा। तिस्रोदेवीः। त्वष्टा। वनस्पतिः। स्वाहाकृतय इति त्रयोदशपदानि॥ २॥
अश्वः। शकुनिः। मंडुकाः। अक्षाः। ग्रावाणः। नराशंसः। रथः। दुंदुभिः। इषु
धिः। हस्ताघ्नः। अभीशवः। धनुः। ज्या। इषुः। अश्वाजनी। उलूखलं। वृषभः।
द्रुघणः। पितुः। नद्यः। आपः। ओषधयः। रात्रिः। अरण्यानी। श्र
द्धा। पृथिवी। अप्वा। अग्नायी। उलूखलमुसले। हविर्धाने। द्यावा
पृथिवी। अघ्या। अग्नायी। विपाट्छुतुद्री। आर्त्नी। शुनासीरौ। देवी
जोष्ट्री। देवीउर्जाहुती। इति षट्त्रिंशत्पदानि॥ ३॥ वायुः। वरुणः। रुद्रः।

इंद्रः। पर्जन्यः। बृहस्पतिः। ब्रह्मणस्पतिः। क्षेत्रस्यपतिः। वास्तोष्पतिः। वाचस्प
तिः। अपान्नपात्। यमः। मित्रः। कः। सरस्वान्। विश्वकर्मा। तार्क्ष्यः। मन्युः।
दधिक्राः। सविता। त्वष्टा। वातः। अग्निः। वेनः। असुनीतिः। ऋतः। इंदुः।
अहिः। प्रजापतिः। अहिर्बुध्न्यः। सुपर्णः। पुरूरवाः। इतिद्वात्रिंशत्पदानि ॥ ४ ॥ श्येन
नः। सोमः। चंद्रमाः। मृत्युः। विश्वानरः। धाता। विधाता। मरुतः। रुद्राः।
ऋभवः। अंगिरसः। पितरः। अथर्वाणः। भृगवः। आप्त्याः। अदितिः।
सरमा। सरस्वती। वाक्। अनुमतिः। राका। सिनीवाली। कुहूः।
यमी। उर्वशी। पृथिवी। इंद्राणी। गौरी। गौः। धेनुः। अघ्न्या। पथ्या।
स्वस्तिः। उषाः। इळा। रोदसीतिषट्त्रिंशत्पदानि ॥ ५ ॥ अश्विनौ। २६
उषाः। सूर्या। वृषाकपायी। सरण्यूः। त्वष्टा। सविता। भगः। सूर्यः। पू

षा। विष्णुः। विश्वानरः। वरुणः। केशी। केशिनः। वृषाकपिः। यमः। अजएकपा
त्। पृथिवी। समुद्रः। अथर्वा। मनुः। दध्यङ्। आदित्याः। सप्तऋषयः।
देवाः। विश्वेदेवाः। साध्याः। वसवः। वाजिनः। देवपत्न्यो देवपत्न्य इत्ये
कत्रिंशत्पदानि ॥ ६ ॥ अग्निर्द्रविणोदा अश्वो वायुश्येनोऽश्विनौ षट् ॥
शके १७४७ पार्थिवनामसंवत्सरे उदगयने ग्रीष्मर्तौ आषाढे
मासि वद्यपक्षे ... द्विने दं पुस्तकं समाप्तं ॥ पंचमोध्यायसमा
प्तः ॥ हउरेकरोपनामकजनार्दनेन लिखितं ॥ यादृशं पुस्तकं दृष्ट्वा तादृ
शं लिखितं मया। यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ॥ श्री चिदंबर
वस्तीतेर्वण। विमलेश्वरप्रसन्न ॥ धूतपापेश्वरप्रसन्न ॥ राम राम राम

इतिचतुष्टयसमाप्तः